Roll No. : ......................................

Total No. of Questions : **12** ]  [ Total No. of Printed Pages : **4**

# APF–2035

## M.A. (Final) Examination, 2022

## SANSKRIT

Paper - VII (B)

## (वर्ग 'ब' वैदिक साहित्य तथा संहिता पाठ)

*Time : 3 Hours* ]  [ *Maximum Marks : 100*

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वे प्रश्ना: अनिवार्या:। पञ्चाशत् शब्देषु उत्तरो प्रदेय:–

   (i) ऋग्वेदीय दशममण्डलस्य नवत्युत्तरशततमस्य (190) सूक्तस्य स्वारस्यं प्रतिपाद्यताम्।

   (ii) मम पुत्रा: शत्रुहणोऽथो मे दुहिता विराट्।

   उताहमस्मि संजया पत्यौ मे श्लोक उत्तम:॥

   अस्य मन्त्रस्य भाव: संस्कृतेन लेखनीय:।

(iii) यो वः शिवतमो ............... इति मन्त्रं पूर्णतया लिखन्तु।

(iv) 'शतं जीवः शरदो वर्धमानः' इति मन्त्रस्य सारः संस्कृत-भाषया लिखन्तु।

(v) 'भूर्भुवः स्वः। तत्सवितुः' इति मन्त्रस्यार्थः लेखनीयः।

(vi) वाजसनेयि संहितायाः प्रथमाध्यायस्य एकं मन्त्रं लिखन्तु।

(vii) ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत।

ततो रात्र्यजायत ततः समुद्रो अर्णवः॥

इत्यस्य मन्त्रस्य पदपाठः लेखनीयः॥

(viii) धनान्नदान-सूक्तस्य ऋषिः छन्दश्च प्रतिपाद्यताम्।

(ix) 'सायणाचार्यस्य वेदभाष्यः कर्मकाण्डपरः' इति विवेच्यताम्।

(x) वेदाङ्गानां नामानि महत्वञ्च प्रतिपाद्यताम्॥

**खण्ड-ब**

**नोट** :– अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः (प्रश्नसंख्या द्वितीयः तृतीयश्च अनिवार्यौ स्तः। शतद्वयेषु शब्देषु (**200**) उत्तरो लेखनीयः।

2. कस्यचिदेकस्य मन्त्रस्य संस्कृतमाध्यमेन व्याख्या विधेया–

(क) उत त्वः पश्यन्नददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम्।

उतो त्वस्मै तन्वं वि सस्त्रे जायेव पत्य उशती सुवासाः॥

(ख) अपेहि मनसस्पतेऽपक्राम परश्चर।

परो निर्ऋहत्या आ चक्ष्व बहुधा जीवतो मनः॥

3. कस्यचिदेकस्य मन्त्रस्य ससन्दर्भं व्याख्यां संस्कृतमाध्यमेन कुर्वन्तु–

(क) अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्।

तां मादेवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तः॥

(ख) अहं रुद्राय धनुरातनोम ब्रह्मद्विषे शरवे हन्तवा उ।

अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश॥

4. कस्यचिदेकस्य मन्त्रस्य टिप्पणियुता सन्दर्भयुता च व्याख्या विधेया–

(क) अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्।
इदमहमनृतात् सत्यमुपैमि॥

(ख) शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा।
शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः॥

5. कस्यचिदेकस्य मन्त्रस्य पदपाठः लेखनीयः।

(क) कया नश्चित्रऽआ भुवदूती सदावृधः सखा।
कया शचिष्ठया वृता॥

(ख) प्रत्युष्ट ँ्रक्षः प्रत्युष्टाऽअरातयो निष्टप्त ँ्रक्षो निष्टप्ताऽअरातयः। उर्वन्तरिक्षमन्वेमि॥

6. (क) 'शास्त्रदृष्ट विरोधाच्च' इति सप्रसंगं व्याख्यायताम्।

**अथवा**

(ख) वेदानां अपौरुषेयत्वं प्रतिपाद्यताम्।

7. कस्यचिदेकस्य मन्त्रस्य अर्थः विधेय–

(क) नमस्ते प्राण क्रन्दाय नमस्ते स्तनयित्नवे।
नमस्ते प्राण विद्युते नमस्ते प्राण वर्षते॥

(ख) आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः॥

8. कस्यचिदेकस्य मन्त्रस्य सप्रसंगं व्याख्या करणीया–

(क) चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥

(ख) तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥

**खण्ड–स**

**नोट** :– अधोलिखितेषु चतुर्षु प्रश्नेषु द्वौ प्रश्नौ शतपञ्चषु **(500)** शब्देषु समाधेयौ–

9. मन्त्रद्वयस्य ऋषिच्छन्ददेवतादि निर्देशपूर्वकं व्याख्या सम्पादनीया–

(क) सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः॥

(ख) यदिन्द्र ब्रह्मणस्पतेऽभिद्रोहं चरामसि।

प्रचेता न आङ्गिरसो द्विषतां पात्वंहसः॥

(ग) अहं केतुरहं मूर्धाहमुग्रा विवाचनी।

ममेदनु क्रतुं पतिः सेहानाया उपाचरेत्॥

(घ) समजैषमिमा अहं सपत्नीरभिभूवरी।

यथाहमस्य वीरस्य विराजानि जनस्य च॥

10. सूक्तद्वयस्य सारांश प्रतिपाद्यताम्—

(क) कालसूक्तम्

(ख) प्राणसूक्तम्

(ग) ज्ञानसूक्तम्

(घ) सूर्यसूक्तम्

11. मन्त्रद्वयस्य सन्दर्भटिप्पणी पुरस्सरं व्याख्या करणीया—

(क) तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ।

आपो जनयथा च नः॥

(ख) यतो यतः समीहसे ततो नोऽअभयं कुरु।

शं नः कुरु प्रजाभ्यौऽभयं नः पशुभ्यः॥

(ग) इन्द्रो विश्वस्य राजति।

शन्नोऽअस्तु द्विपदे शं चतुष्पदे॥

(घ) वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्।

देवस्त्वा सविता पुनातु बसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥

12. ऋग्वेदभाष्यभूमिकामधिकृत्य 'वैदिकमन्त्राणां अर्थवत्ता' विवेच्यताम्।

**अथवा**

ऋग्वेदभाष्यमधिकृत्य विधिवाक्यानां प्रामाण्यस्य समीक्षा क्रीयताम्।